लक्ष्मीचन्द्र इति श्रुतस्सुजनको, यस्यास्ति धर्मोद्यत-
श्चार्वाचारविचारचारुचरिता, माता च दीपालिका ।
वाग्दक्षो हि सतां प्रियो गुणनिधिः, श्रीबालचन्द्रोऽनुजो ।
वन्देऽहं शुभपादपद्मयुगलं, तं नेमिसूरीश्वरम् ॥ ७ ॥

येषामीक्षणतोऽपि यान्ति विपुलं, भाग्योदयं सज्जना ।
भूपालावलिमौलिपूजितपदा,—म्भोजं च दिव्याकृतिम् ॥
सम्पूर्णेन्दुसुमण्डलाभवदनं, चन्द्रार्धभालस्थलं ।
वन्देऽहं शुभपादपद्मयुगलं, तं नेमिसूरीश्वरम् ॥ ८ ॥

[स्रग्धरावृत्तम्]

नानाविद्याब्धिदेवाचलविमलधिया—मुक्तिसौभाग्यभाजां ।
श्रीमल्लावण्यसूरीश्वरप्रगुरुसतां, दक्षनाम्नो गुरोश्च ॥

आसाद्यानुग्रहं चाष्टकमिदममलं, श्रीसुशीलेन दृब्धं ।
नित्यं भव्यात्मनां वै श्रुतिपठनकृतां मोददानाय भूयात् ॥ १ ।

॥ इति श्रीनेमिसूरीश्वराष्टकम् ॥

सर्वतन्त्रस्वतन्त्र-शासनसम्राट्-सूरिचक्रचक्रवर्त्ति जगद्गुरुतपागच्छाधिपति-भट्टारक

जन्म सं. १९२९ कार्तिक शु. १ मधुमती (महुवा) : दीक्षा सं. १९४५ ज्येष्ठ शु. ७ भावनगर

गणिपद सं. १९६० कार्तिक कृष्ण ७ वल्लभीपुर (वळा) : पन्यासपद सं. १९६० मागशर शु. ३ वल्लभीपुर (वळा)

भव्याब्ध्यामदवृद्धिचन्द्रसदृशं, श्रीनेमिसूरीश्वरं ।
सम्यग्दर्शनबोधदानसदनं, चारित्रभानूदयम् ॥
जैनेन्द्रागमतत्त्वनन्दनघनं, लावण्ययोगालयं ॥
भो दक्षास्त्रिविधं हितं प्रणमत, प्रज्ञाप्रमोदक्षमम् ॥ १ ॥

आचार्य श्रीविजयनेमिसूरीश्वरः

सूरिपद सं. १९६४ ज्येष्ठ शु. ५ भावनगर

तपोगच्छाधिपति–सर्वतन्त्रस्वतन्त्र–शासनसम्राट्–सूरिचक्रचक्रवर्त्ति–जगद्गुरु–भट्टारकाचार्यवर्य–
श्रीमद्विजयनेमिसूरीश्वरपट्टालङ्कार–
व्याकरणवाचस्पति–शास्त्रविशारद–कविरत्न–निरुपमव्याख्यानसुधावर्षि–विबुधशिरोमणि–धातुरत्नाकर-
तिलकमञ्जरीटीकाद्यनेकग्रन्थप्रणेता—

जन्म–वि. सं. १९५३ भाद्रपद वद ५ **दीक्षा**–वि. सं. १९७२ अषाढ सुद ५ **बडी दीक्षा**–वि. सं. १९७३ मागशर सुद ३ सादडी, (मारवाड) ॥ वद २, अमदावाद ॥

प्रवर्त्तकपद–वि. सं. १९८७ कार्तिक (प्रायः) बोटाद (काठीयावाड) ॥ सादडी, (मारवाड) ॥



गणिपद–वि. सं. १९९० मागशर **पन्यासपद**–वि. सं. १९९० मागशर **उपाध्याय पद**–वि. सं. १९९१ जेठ वद १२, महुवा (काठीयावाड)॥ सुद ४, अमदावाद ॥

आचार्यपद–वि. सं. १९९२ वैशाख सुद ८, भावनगर ॥ सुद १०, भावनगर ॥

भट्टारकाचार्यश्रीमद्विजयलावण्यसूरीश्वरः ॥

"न्यायव्याकरणागमेषु ललिते, काव्ये तथा छन्दसि। साहित्यप्रभृतौ प्रबन्धगगने यद्धीकराः विस्तृताः॥
प्रत्युत्पन्नमतिः प्रसादसदनं, व्याख्यानवाचस्पतिः। सोऽयं दक्षप्रमोददो विजयते, लावण्यसूरीश्वरः॥१॥

× प्रकृतिग्रहणे यङ्लुबन्तस्यापि ग्रहणम् ×

यस्माच्छब्दाद्यः प्रत्ययो विधीयते सा तस्य प्रकृतिः, सा चात्र सामर्थ्याद्धातुरूपैव ग्राह्या यङ्लुबन्तत्वस्यान्यत्रासम्भवात्, एवमुत्तरन्यायेऽपि वाच्यम्। यस्य धातोः केवलस्य यत् कार्यमुक्तं तत् तस्य यङ्लुबन्तस्यापि स्यात्, तेन प्रणिदत्ते इत्यत्र केवले इव यङ्लुबन्तेऽपि दागि परे "नेर्ङ्मादा०" [२, ३, ७९] इति नेर्नो णः सिद्धः, यथा—प्रणिदादेति। सत्ताकरं चास्य "एकस्वरादनुस्वारेतः" [४, ४, ४५] इति बृहत्सूत्ररचनम्। तथाहि। अनुस्वारेतस्तावत् कृगादिधातवः, ते च सर्वेऽप्येकस्वरा एव भवन्ति, न त्वनेकस्वरः कश्चिदप्यनुस्वारेदस्तीत्यतः "एकस्वराद्" इत्यस्य व्यवच्छेद्याभावात् कर्तेत्यादाविङ्निषेधार्थम् "अनुस्वारेतः" इत्येतावताऽपि सूत्रेण सरति। अथेत्थं ब्रूषे, अस्ति हनादेशो वधधातुरदन्तत्वादनेकस्वरः स्थानिवद्भावाच्चानुस्वारेच्च, तत्प्रयोगेषु चावधीदित्यादिषु इङ्निषेधो न दृश्यते; "अनुस्वारेतः" इत्येतावदेव च सूत्रं यदि क्रियते तदा अवधीत् इत्यादिषु इङ्निषेधः प्रसज्यते इति चेत्तर्हि तस्येङ्निषेधनिवृत्त्यर्थम् "अवधानुस्वारेतः" इति सूत्रमस्तु, "एकस्वरानुस्वारेतः" [४, ४, ५६] इत्येतावत्तु किमर्थम्? एवं सूत्रकृतिर्हि तदैव सार्थिका स्याद्यदि न केवलमेको वधधातुः किन्त्वन्येऽपि बहवो धातवोऽनेकस्वरानुस्वारेतः स्युर्नत्वन्यथा,तादृशाश्च बहवो धातवस्तदैव सम्भवेयुः यदि कृगादीन् यङ्लुबन्तीकृत्यैष न्यायः स्फोर्यते। तद्यथा कृधातुर्यङ्लुबन्तत्वे चर्क्र इत्यादिरूपत्वादनेकस्वर एतन्न्यायस्फोरणादनुस्वारेच्चेति; ततश्च चर्करितेत्यादावबधीदित्यादावपि चेङ्निषेधनिवृत्त्यर्थत्वाद् "एकस्वरादनुस्वारेतः" इति सूत्रकृतिः सार्थिका स्यात्। तदेवमिमं न्यायं विनाऽनुपपद्यमानमनेकस्वरानुस्वारेद्धातुबाहुल्यं विनाऽनुपपद्यमानम् "एकस्वरादनुस्वारेतः" [४, ४, ५६] इति बृहत्सूत्रकरणमिमं न्यायं ज्ञापयति। चटुलश्चायमग्रेतनेनापोद्यमानत्वात्॥

× तिवा शवाऽनुबन्धेन निर्दिष्टं यद् गणेन च।
एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपि ॥ १ ॥ ×

निर्दिष्टमिति तिवेत्यादिचतुर्षु योज्यम्। ततश्च तिवादिनिर्दिष्टमेकस्वरशब्दमुच्चार्य विहितं च कार्यं विवक्षितधातोर्यदि यङ्लुप् स्यात् तदा न स्यात्। पूर्वेणातिप्रसंगे प्राप्ते तन्निषेधपरोऽयं न्यायः। तत्र तिवा निर्दिष्टं द्विधा—अलुप्तेन लुप्तेन च। तत्रालुप्तेन यथा—"न कवतेर्यङः" [४-१-४८] इति कस्य चत्वनिषेधः। अयं कोकूयते इत्यादौ स्याच्चौकवीतीत्यादौ तु न। लुप्तेन यथा—"ङे पिबः पीप्य् [४-१-३३] इति पीप्यादेशः। अयं पिबतेः केवलस्य स्याद्यथा

पिबन्तं प्रायुक्त अपीप्यत्, यङ्लुबन्तस्य तु न स्याद्यथा पापतं प्रायुक्त अपापयत्। शवा निर्दिष्टं यथा–" निसस्तपेऽनासेवायाम् " [२–३–३५] इति निसः सस्य षत्वम्। इदं निष्टपतीत्यादौ स्यान्निस्तातपीतीत्यादौ तु न। अनुबन्धेन निर्दिष्टं यथा–" गापास्थासादामाहाकः [४–३–९६] इति एत्वम्। इदं हेयादित्यादौ स्याज्जहायादित्यादौ तु न। गणेन निर्दिष्टं त्रिधा–संख्यया आदिशब्देन बहुवचनेन च। तत्र संख्यया यथा–" रुत्पश्चकाच्छिदयः " [४–४–८८] इतीट्। अयं स्वपितीत्यादौ स्यात्सोषोप्तीत्यादौ तु न। आदिशब्देन यथा–" लृदिद्युतादिपुष्यादेः परस्मै " [३–४–६४] इत्यङ्। अयमद्युतदित्यादौ स्यात् अदेद्योतीदित्यादौ तु न। बहुवचनेन यथा–" तेर्ग्रहादिभ्यः " [४–४–३३] इत्यनेन ग्रहादिभ्यः परस्याशितस्तिप्रत्ययस्यादौ " स्ताद्यशितो० " [४–४–३२] इत्यनेन प्राप्तस्य इटोऽनुज्ञाविधिः। स भणितिः इत्यादौ स्यात् बम्भाणितिरित्यादौ तु न। एकस्वरनिमित्तं यथा–" एकस्वरादनुस्वारेतः " [४–४–५६] इतीड्निषेधः। अयं शक्त इत्यादौ स्यात् शाशकित इत्यादौ तु न। ननु शाशकित इत्यादावेकस्वरत्वाभावादेव "एकस्वरादनुस्वारेतः" इति सूत्रं न प्रवर्त्स्यति किं न्यायेन, सत्यम्, परं शकिधातुर्यद्येकस्वरस्तदा प्रकृतिग्रहणे यङ्लुबन्तस्यापीति न्यायात् शासकिरप्येकस्वर उच्यते। तथा चात्रापि " एकस्वरादनुस्वारेतः " [४–४–५६] इतीड्निषेधः प्राप्नोति, परमेतन्न्यायेन निषेधान्न स्यात्। व्यक्तिकरं त्वस्य तत्तत्सूत्रेषु तिवादिनिर्देशा एव। तथाहि। तिवादिनिर्देशास्तावत्तत्तत्सूत्रेषु कृतास्तेषां च विशेषः प्रायोऽन्यः कोऽपि न, एतावांस्तु दृश्यते, यदुत यङ्लुबन्तप्रयोगेषु तत्तत्सूत्रोक्तकार्याणि न सन्तीति ततोऽर्थापत्त्या ज्ञायते–एतदर्थमेवैते कृता इति। तरलत्वं त्वस्याद्ये पञ्चमे चांशे न। दृश्यते शेषेषु च दृश्यते। तत्र द्वितीये यथा–अपादित्यादाविव अपापादित्यादावपि " पिबैतिदाभूस्थः सिचो लुप्परस्मै न चेद् " [४, ३, ६६] इत्यनेन शब्निर्दिष्टोऽपि सिचो लुबिङ्निषेधश्चाभूताम्। तृतीये यथा–नृत्त इत्यादाविव नरीनृत्तः इत्यादावपि " डीयश्व्यैदितः क्त्वयोः " [४, ४, ६१] इत्यनेनानुबन्धनिर्दिष्टोपि इड्निषेधोऽजनि। तुर्ये यथा–स्प्रष्टा इत्यादाविव स्पृशेर्यङ्लुपि रागमे तिवि पर्स्प्रष्टि इत्यादावपि " स्पृशादिसृपो वा " [४, ४, ११२] इत्यनेन गणनिर्दिष्टोप्यदागम आगात् ॥

॥ श्रीमज्जिनपुङ्गवेभ्यो नमः ॥

सकलस्वपरसमयपारावारपारीण–विद्यापीठादिप्रस्थानपञ्चकसमाराधक–तपोगच्छाधिपति–
भट्टारकाचार्य–जगद्गुरुश्रीमद्विजयनेमिसूरिभगवद्भ्यो नमः ॥

श्रीमत्तपोगणगगनाङ्गणगगनमणि-सार्वसार्वज्ञशासनसार्वभौम–कोविद-
कुलालङ्कार–अखण्डविजयश्रीमद्गुरुराजविजयनेमिसूरीश्वर–
चरणारविन्दचञ्चरीकायमाणान्तिषन्मुनिलावण्यविजयप्रणीतो——

॥ धातुरत्नाकरः ॥

॥ तस्य चायं पञ्चमो भागः ॥

नत्वा श्रीनेमिनामान–माजन्मब्रह्मचारिणम् ।
तीर्थनाथं गुरुं चैव भारतीं जिनभाषिताम् ॥ १ ॥

धातुरत्नाकरस्याहं लावण्यविजयो मुनिः ।
भागं पञ्चममातन्वे बालानां सुखहेतवे ॥ २ ॥

यङन्तरूपपरम्पराप्रकृतिनिरूपणानन्तरं यङ्लुबन्तरूपा परम्पराप्रकृतिरुदाह्रियते । बहुलं लुप् ॥ ३ । ४ । १४ ॥ यङो लुब् बहुलं भवति । बोभूयते । बोभवीति । बोभोति । रोरूयते । रोरवीति । रोरोति । लालप्यते । लालपीति । लालप्ति । चंक्रम्यते । चंक्रमीति । चंक्रन्ति । जंजप्यते । जंजपीति । जंजप्ति । बहुलग्रहणं प्रयोगानुसरणार्थम् । तेन क्वचिन्न भवति । लोलूया । पोपूया ॥ यङ्लुप् चेति वचनाद् यङ्लुबन्तानामदादित्वम् । इङित इत्यनुबन्धनिर्देशाद्यङ्लुबन्तादात्मनेपदं न भवति । यङ्तुरुस्तोरिति वेडागमः ॥

तिवा शवानुबन्धेन, निर्दिष्टं यद् गणेन च ।
एकस्वरनिमित्तं च, पञ्चैतानि न यङ्लुपि ॥ १ ॥

॥ १ भू सत्तायाम् ॥

वर्त्तमाना, लट्, Present.

बोभवीति, बोभोति } बोभूतः, बोभुवति ।
बोभवीषि, बोभोषि } बोभूथः, बोभूथ ।
बोभवीमि, बोभोमि } बोभूवः, बोभूमः ॥

सप्तमी, विध्यर्थे, लिङ्, Potential.

बोभूयात्, बोभूयाताम्, बोभूयुः ।
बोभूयाः, बोभूयातम्, बोभूयात ।
बोभूयाम्, बोभूयाव, बोभूयाम ॥

पञ्चमी, आज्ञार्थे, लोट्, Imperative.

बोभवीतु, बोभोतु, बोभूतात् } बोभूताम् } बोभुवतु ।
बोभूहि, बोभूतात् } बोभूतम्, बोभूत ।
बोभवानि, बोभवाव, बोभवाम ॥

ह्यस्तनी, लङ्, Imperfect.

अबोभवीत्, अबोभोत् } अबोभूताम्, अबोभवुः ।
अबोभवीः, अबोभोः } अबोभूतम्, अबोभूत ।
अबोभवम्, अबोभूव, अबोभूम ॥

अद्यतनी, लुङ्, Aorist.

अबोभोत्, अबोभोताम्, अबोभूवन् ।
अबोभोः, अबोभोतम्, अबोभोत ।
अबोभूवम्, अबोभोव, अबोभोम ॥

केचित्तु—

अबोभूवीत्, अबोभोत् } अबोभूताम्, अबोभूवुः ।
अबोभूवीः, अबोभोः } अबोभूतम्, अबोभूत ।
अबोभूवम्, अबोभूव, अबोभूम ॥

परोक्षा, लिट्, Perfect ॥

बोभवाञ्चकार, बोभवाञ्चकतुः, बोभवाञ्चकुः ।
बोभवाञ्चकर्थ, बोभवाञ्चक्रथुः, बोभवाञ्चक्र ।
बोभवाञ्चकार, बोभवाञ्चकर } बोभवाञ्चकृव, बोभवाञ्चकृम ।
बोभवाम्बभूव, बोभवाम्बभूवतुः, बोभवाम्बभूवुः ।
बोभवाम्बभूविथ, बोभवाम्बभूवथुः, बोभवाम्बभूव ।
बोभवाम्बभूव, बोभवाम्बभूविव, बोभवाम्बभूविम ॥
बोभवामास, बोभवामासतुः, बोभवामासुः ।
बोभवामासिथ, बोभवामासथुः, बोभवामास ।
बोभवामास, बोभवामासिव, बोभवामासिम ॥

आशीः, लिङ्, Benedictive.

बोभूयात्, बोभूयास्ताम्, बोभूयासुः ।
बोभूयाः, बोभूयास्तम्, बोभूयास्त ।
बोभूयासम्, बोभूयास्व, बोभूयास्म ॥

श्वस्तनी, लुट्, I-Future

बोभविता, बोभवितारौ, बोभवितारः ।
बोभवितासि, बोभवितास्थः, बोभवितास्थ ।
बोभवितास्मि, बोभवितास्वः, बोभवितास्मः ॥

भविष्यन्ती, लृट्, II-Future.

बोभविष्यति, बोभविष्यतः, बोभविष्यन्ति ।
बोभविष्यसि, बोभविष्यथः, बोभविष्यथ ।
बोभविष्यामि, बोभविष्यावः, बोभविष्यामः ॥

क्रियातिपत्तिः, लृङ्, Conditional.

अबोभविष्यत्, अबोभविष्यताम्, अबोभविष्यन् ।
अबोभविष्यः, अबोभविष्यतम्, अबोभविष्यत ।
अबोभविष्यम्, अबोभविष्याव, अबोभविष्याम ॥

२ पां (पा) पाने ॥

व० पा–पेति, पाति, पीतः, पति, पेषि, पासि, पीथः, पीथ, पेमि, पामि, पीवः, पीमः ॥

स० पापी–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

प० पा–पेतु, पातु, पीतात्, पीताम्, पतु, पीहि, पीतात्, पीतम्, पीत, पानि, पाव, पाम ॥

ह्य० अपा–पेत्, पात्, पीताम्, पुः, पेः, पाः, पीतम्, पीत, पाम्, पीव, पीम ॥

अ० अपा–पात्, पाताम्, पुः, पाः, पातम्, पात, पाम्, पाव, पाम ॥

प० पापा–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

आ०पापेया–त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥

श्व० पापिता–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

भ० पापिष्यू–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

क्रि० अपापिष्यू–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

३ घ्रां (घ्रा) गन्धोपादाने ॥

१ **जा**–घ्रेति, घ्राति, घ्रीतः, घ्रति, घ्रेषि, घ्रासि, घ्रीथः, घ्रीथ, घ्रेमि, घ्रामि, घ्रीवः, घ्रीमः ॥ [याव, याम ॥

२ **जाघ्री**–यात्, याताम्, युः, याः, यातम्, यात, याम्,

३ **जा**–घ्रेतु, घ्रातु, घ्रीतात्, घ्रीताम्, घ्रतु, घ्रीहि, घ्रीतात्, घ्रीतम्, घ्रीत, घ्राणि, घ्राव, घ्राम ॥

४ **अजा**–घ्रेत्, घ्रात्, घ्रीताम्, घ्रुः, घ्रेः, घ्राः, घ्रीतम्, घ्रीत, घ्राम्, घ्रीव, घ्रीम ॥

५ **अजाघ्रास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥ [घ्राव, घ्राम ॥

,, **अजा**–घ्रात्, घ्राताम्, घ्रुः, घ्राः, घ्रातम्, घ्रात, घ्राम्,

६ **जाघ्रा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **जाघ्रेया** / **जाघ्राया** –त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥

८ **जाघ्रिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **जाघ्रिष्यू**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१०**अजाघ्रिष्यू**–अत्, अताम्, अन्, अः, अतम्, अत,

४ ध्मां (ध्मा) शब्दाग्निसंयोगयोः ॥

१ **दा**–ध्मेति, ध्माति, ध्मीतः, ध्मति, ध्मेषि, ध्मासि, ध्मीथः, ध्मीथ, ध्मेमि, ध्मामि, ध्मीवः, ध्मीमः ॥

२ **दाध्मी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **दा**–ध्मेतु, ध्मातु, ध्मीतात्, ध्मीताम्, ध्मतु, ध्मीहि, ध्मीतात्, ध्मीतम्, ध्मीत, ध्मानि, ध्माव, ध्माम ॥

४ **अदा**–ध्मेत्, ध्मात्, ध्मीताम्, ध्मुः, ध्मेः, ध्माः, ध्मीतम्, ध्मीत, ध्माम्, ध्मीव, ध्मीम ॥

५ **अदाध्मास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **दाध्मा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **दाध्मेया**–त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥

८ **दाध्मिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **दाध्मिष्यू**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अदाध्मिष्यू**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

५ ष्ठां (स्था) गतिनिवृत्तौ ॥

१ **ता**–स्थेति, स्थाति, स्थीतः, स्थति, स्थेषि, स्थासि, स्थीथः, स्थीथ, स्थेमि, स्थामि, स्थीवः, स्थीमः ॥

२ **तास्थी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **ता**–स्थेतु, स्थातु, स्थीतात्, स्थीताम्, स्थतु, स्थीहि, स्थीतात्, स्थीतम्, स्थीत, स्थानि, स्थाव, स्थाम ॥

४ **अता**–स्थेत्, स्थात्, स्थीताम्, स्थुः, स्थेः, स्थाः, स्थीतम्, स्थीत, स्थाम्, स्थीव, स्थीम ॥

५ **अता**–स्थात्, स्थाताम्, स्थुः, स्थाः, स्थातम्, स्थात, स्थाम्, स्थाव, स्थाम ॥

६ **तास्था**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **तास्थेया**–त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥

८ **तास्थिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **तास्थिष्यू**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अतास्थिष्यू**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

६ म्नां (म्ना) अभ्यासे ॥

१ **मा**-म्नेति, म्नाति, म्नीतः, म्नति, म्नेषि, म्नासि, म्नीथः, म्नीथ, म्नेमि, म्नामि, म्नीवः, म्नीमः ॥

२ **माज्ञी**-यात्, यातम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **मा**-म्नेतु, म्नातु, म्नीतात्, म्नीताम्, म्नतु, म्नीहि, म्नीतात्, म्नीतम्, म्नीत, म्नानि, म्नाव, म्नाम ॥

४ **अमा**-म्नेत्, म्नात्, म्नीताम्, म्नुः, म्नेः, म्नाः, म्नीतम्, म्नीत, म्नाम्, म्नीव, म्नीम ॥

५ **अमाज्ञास्**-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **माम्ना**-म्बकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **माम्नेया** / **माम्नाया** -त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥

८ **माम्निता** -", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **माम्निष्यू**-अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अमाम्निष्यू**-अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

७ दांम् (दा) दाने ॥

१ **दा**-देति, दाति, त्तः, दति, देषि, दासि, त्थः, त्थ, देमि, दामि, द्वः, द्मः ॥

२ **दाद्**-यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **दादेतु**-दादातु, दात्तात्, दात्ताम्, दादतु, देहि, दात्तात्, दात्तम्, दात्त, दादा-नि, व, म ॥

४ **अदा**-देत्, दात्, त्ताम्, दुः, देः, दाः, त्तम्, त्त, दाम्, द्व, द्म ॥

५ **अदा**-दात्, दाताम्, दुः, दाः, दातम्, दात, दाम्, दाव, दाम ॥

६ **दादा**-म्बकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **दादेया**-त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥

८ **दादिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **दादिष्यू**-अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अदादिष्यू**-अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

८ जिं (जि) जये ॥

१ **जे**-जयीति, जेति, जितः, ज्यति, जयीषि, जेषि, जिथः, जिथ, जयीमि, जेमि, जिवः, जिमः ॥

२ **जेजि**-यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **जे**-जयीतु, जेतु, जितात्, जिताम्, ज्यतु, जिहि, जितात्, जितम्, जित, जयानि, जयाव, जयाम ॥

४ **अजे**-जयीत्, जेत्, जिताम्, जयुः, जयीः, जेः, जितम्, जित, जयम्, जिव, जिम ॥

५ **अजेजाय्**-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **जेजया**-म्बकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **जेजीया**-त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥

८ **जेजयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **जेजयिष्यू**-अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अजेजयिष्यू**-अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

९ ज्रिं (ज्रि) अभिभवे ॥

१ **जे**-ज्रयीति, ज्रेति, ज्रितः, ज्रियति, ज्रयीषि, ज्रेषि, ज्रिथः, ज्रिथ, ज्रयीमि, ज्रेमि, ज्रिवः, ज्रिमः ॥

२ **जेज्रि**-यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **जे**-ज्रयीतु, ज्रेतु, ज्रितात्, ज्रिताम्, ज्रियतु, ज्रिहि, ज्रितात्, ज्रितम्, ज्रित, ज्रयाणि, ज्रयाव, ज्रयाम ॥

४ **अजे**-ज्रयीत्, ज्रेत्, ज्रिताम्, ज्रयुः, ज्रयीः, ज्रेः, ज्रितम्, ज्रित, ज्रयम्, ज्रिव, ज्रिम ॥

५ **अजेज्राय्**-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **जेज्रया**-म्बकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **जेज्रीया**-त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥

८ **जेज्रयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **जेज्रयिष्यू**-अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अजेज्रयिष्यू**-अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

१० क्षिं (क्षि) क्षये ॥

१ **चे**–क्षयीति, क्षेति, क्षितः, क्षियति, क्षयीषि, क्षेषि, क्षिथः, क्षिथ, क्षयीमि, क्षेमि, क्षिवः, क्षिमः ॥

२ **चेक्षि**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **चे**–क्षयीतु, क्षेतु, क्षितात्, क्षिताम्, क्षियतु, क्षिहि, क्षितात्, क्षितम्, क्षित, क्षयाणि, क्षयाव, क्षयाम ॥

४ **अचे**–क्षयीत्, क्षेत्, क्षिताम्, क्षयुः, क्षयीः, क्षेः, क्षितम्, क्षित, क्षयम्, क्षिव, क्षिम ॥

५ **अचेक्षाय्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **चेक्षया**–ञकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **चेक्षीया**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **चेक्षयिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **चेक्षयिष्य्**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१० **अचेक्षयिष्य्**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

११ दुं (दु) गतौ ॥

१ **दो**–दवीति, दोति, दुतः, दुवति, दवीषि, दोषि, दुथः, दुथ, दवीमि, दोमि, दुवः, दुमः ॥

२ **दोदु**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **दो**–दवीतु, दोतु, दुतात्, दुताम्, दुवतु, दुहि, दुतात्, दुतम्, दुत, दवानि, दवाव, दवाम ॥

४ **अदो**–दवीत्, दोत्, दुताम्, दवुः, दवीः, दोः, दुतम्, दुत, दवम्, दुव, दुम ॥

५ **अदोदाव्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **दोदवा**–ञकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **दोदूया**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म, ॥

८ **दोदविता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **दोदविष्य्**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१० **अदोदविष्य्**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

१२ द्रुं (द्रु) गतौ ॥

१ **दो**–द्रवीति, द्रोति, द्रुतः, द्रुवति, द्रवीसि, द्रोषि, द्रुथः, द्रुथ, द्रवीमि, द्रोमि, द्रुवः, द्रुमः ॥

२ **दोद्रु**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **दो**–द्रवीतु, द्रोतु, द्रुतात्, द्रुताम्, द्रुवतु, द्रुहि, द्रुतात्, द्रुतम्, द्रुत, द्रवाणि, द्रवाव, द्रवाम ॥

४ **अदो**–द्रवीत्, द्रोत्, द्रुताम्, द्रवुः, द्रवीः, द्रोः, द्रुतम्, द्रुत, द्रुवम्, द्रुव, द्रुम ॥

५ **अदोद्रुव**–त्, ताम्, न्, :, तम्, त, म्, अदोद्रुवा–व, म ॥

६ **दोद्रवा**–ञकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **दोद्रूया**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म॥

८ **दोद्रविता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **दोद्रविष्य्**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१० **अदोद्रविष्य्**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

१३ शुं (शु) गतौ ॥

१ **शो**–शवीति, शोति, शुतः, शुवति, शवीषि, शोषि, शुथः, शुथ, शवीमि, शोमि, शुवः, शुमः ॥

२ **शोशु**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **शो**–शवीतु, शोतु, शुतात्, शुताम्, शुवतु, शुहि, शुतात्, शुतम्, शुत, शवानि, शवाव, शवाम ॥

४ **अशो**–शवीत्, शोत्, शुताम्, शवुः, शवीः, शोः, शुतम्, शुत, शवम्, शुव, शुम ॥

५ **अशोशाव्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **शोशवा**–ञकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **शोशूया**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म॥

८ **शोशविता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **शोशविष्य्**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१० **अशोशविष्य्**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

१४ स्रुं (स्रु) गतौ ॥

१ **सो**–स्रवीति, स्रोति, स्रुतः, स्रुवति, स्रवीषि, स्रोषि, स्रुथः, स्रुथ, स्रवीमि, स्रोमि, स्रुवः, स्रुमः ॥

२ **सोस्रु**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **सो**–स्रवीतु, स्रोतु, स्रुतात्, स्रुताम्, स्रुवतु, स्रुहि, स्रुतात्, स्रुतम्, स्रुत, स्रवाणि, स्रवाव, स्रवाम ॥

४ **असो**–स्रवीत्, स्रोत्, स्रुताम्, स्रवुः, स्रवीः, स्रोः, स्रुतम्, स्रुत, स्रवम्, स्रुव, स्रुम ॥

५ **असोस्रुव**–त्, ताम्, न्, :, तम्, त, म्, असोस्रुवा-व, म ॥

६ **सोस्रवा**–यकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **सोस्रूया**–त्, स्ताम्, सुः, स्तम्, स्त, सम्, स्व, स्म ॥

८ **सोस्रविता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **सोस्रविष्यू**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**असोस्रविष्यू**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

१५ ध्रुं (ध्रु) स्थैर्ये च ॥

१ **दो**–ध्रवीति, ध्रोति, ध्रुतः, ध्रुवति, ध्रवीषि, ध्रोषि, ध्रुथः, ध्रुथ, ध्रवीमि, ध्रोमि, ध्रुवः, ध्रुमः ॥

२ **दोध्रु**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **दो**–ध्रवीतु, ध्रोतु, ध्रुतात्, ध्रुताम्, ध्रुवतु, ध्रुहि, ध्रुतात्, ध्रुतम्, ध्रुत, ध्रवाणि, ध्रवाव, ध्रवाम ॥

४ **अदो**–ध्रवीत्, ध्रोत्, ध्रुताम्, ध्रवुः, ध्रवीः, ध्रोः, ध्रुतम्, ध्रुत, ध्रवम्, ध्रुव, ध्रुम ॥

५ **अदोध्राव्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **दोध्रवा**–यकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **दोध्रूया**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **दोध्रविता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **दोध्रविष्यू**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अदोध्रविष्यू**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

१६ सुं (सु) प्रसवैश्वर्ययोः ॥

१ **सो**–सवीति, सोति, सुतः, सुवति, सवीषि, सोषि, सुथः, सुथ, सोवीमि, सोमि, सुवः, सुमः ॥

२ **सोसु**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **सो**–सवीतु, सोतु, सुतात्, सुताम्, सुवतु, सुहि, सुतात्, सुतम्, सुत, सवानि, सवाव, सवाम ॥

४ **असो**–सवीत्, सोत्, सुताम्, सवुः, सवीः, सोः, सुतम्, सुत, सवम्, सुव, सुम ॥

५ **असोसाव्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **सोसवा**–यकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **सोसूया**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **सोसविता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **सोसविष्यू**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१० **असोसविष्यू**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

१७ स्मृं (स्मृ) चिन्तायाम् ॥

१ **सरि**–स्मरीति, स्मर्ति, स्मृतः, स्मरति, स्मरीषि, स्मर्षि, स्मृथः, स्मृथ, स्मरीमि, स्मर्मि, स्मृवः, स्मृमः ॥

२ **सरिस्मृ**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **सरि**–स्मरीतु, स्मर्तु, स्मृतात्, स्मृताम्, स्मरतु, स्मृहि, स्मृतात्, स्मृतम्, स्मृत, स्मराणि, स्मराव, स्मराम ॥

४ **असरि**–स्मरीत्, स्मः, स्मृताम्, स्मरुः, स्मरीः, स्मः, स्मृतम्, स्मृत, स्मरम्, स्मृव, स्मृम ॥

५ **असरिस्मार्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **सरिस्मरा**–यकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **सरिस्मर्या**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **सरिस्मरिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **सरिस्मरिष्यू**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अत, अम्, आव, आम ॥

१०**असरिस्मरिष्यू**–अत्, अताम्, अन्, अः, अतम्, **पक्षे**–सरिस्थाने, सरी, इति, सर्–इति च ज्ञेयम् ॥

१८ गृं (गृ) सेचने ॥

१ **जरि**-गरीति, गर्ति, गृतः, ग्रति, गरीषि, गर्षि, गृथः, गृथ, गरीमि, गर्मि, गृवः, गृमः ॥

२ **जरिगृ**-यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **जरि**-गरीतु, गर्तु, गृतात्, गृताम्, ग्रतु, गृहि, गृतात्, गृतम्, गृत, गराणि, गराव, गराम ॥

४ **अजरि**-गरीत्, गः, गृताम्, गरुः, गरीः, गः, गृतम्, गृत, गरम्, गृव, गृम ॥ [इष्व, इष्म ॥

५ **अजरिगार्**-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्,

६ **जरिगरा**-ञकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **जरिग्रिया**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म॥

८ **जरिगरिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **जरिगरिष्यू**-अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१० **अजरिगरिष्यू**-अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

पक्षे-जरि स्थाने, जरी-इति, जर् इति च ज्ञेयम् ॥

१९ घृं (घृ) सेचने ॥

१ **जरि**-घरीति, घर्ति, घृतः, घ्रति, घरीषि, घर्षि, घृथः, घृथ, घरीमि, घर्मि, घृवः, घृमः ॥

२ **जरिघृ**-यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **जरि**-घरीतु, घर्तु, घृतात्, घृताम्, घ्रतु, घृहि, घृतम्, घृत, घराणि, घराव, घराम ॥

४ **अजरि**-घरीत्, घः, घृताम्, घरुः, घरीः, घः, घृतम्, घृत, घरम्, घृव, घृम ॥ [इष्व इष्म ॥

५ **अजरिघार्**-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्,

६ **जरिघरा**-ञकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **जरिघ्रिया**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म॥

८ **जरिघरिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **जरिघरिष्यू**-अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१० **अजरिघरिष्यू**-अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

पक्षे-जरि स्थाने, जरी-इति, जर्-इति च ज्ञेयम् ॥

२० औस्वृ (स्वृ) शब्दोपतापयोः ॥

१ **सरि**-स्वरीति, स्वर्ति, स्वृतः, स्व्रति, स्वरीषि, स्वर्षि, स्वृथः, स्वृथ, स्वरीमि, स्वर्मि, स्वृवः, स्वृमः ॥

२ **सरिस्वृ**-यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **सरि**-स्वरीतु, स्वर्तु, स्वृतात्, स्वृताम्, स्व्रतु, स्वृहि, स्वृतात्, स्वृतम्, स्वृत, स्वराणि, स्वराव, स्वराम॥

४ **असरि**-स्वरीत्, स्वः, स्वृताम्, स्वरुः, स्वरीः, स्वः, स्वृतम्, स्वृत, स्वरम्, स्वृव, स्वृम ॥

५ **असरिस्वार्**-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **सरिस्वरा**-ञकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **सरिस्वर्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म॥

८ **सरिस्वरिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **सरिस्वरिष्यू**-अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१० **असरिस्वरिष्यू**-अत्, अताम्, अन्, अः, अतम्, अत,

पक्षे-सरि स्थाने, सरी-इति, सर्-इति च ज्ञेयम् ॥

२१ द्रृ (द्रृ) वरणे ॥

१ **दरि**-द्वरीति, द्वर्ति, द्वृतः, द्व्रति, द्वरीषि, द्वर्षि, द्वृथः, द्वृथ, द्वरीमि, द्वर्मि, द्वृवः, द्वृमः ॥

२ **दरिद्रृ**-यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **दरि**-द्वरीतु, द्वर्तु, द्वृतात्, द्वृताम्, द्व्रतु, द्वृहि, द्वृतात्, द्वृतम्, द्वृत, द्वराणि, द्वराव, द्वराम ॥

४ **अदरि**-द्वरीत्, द्वः, द्वृताम्, द्वरुः, द्वरीः, द्वः, द्वृतम्, द्वृत, द्वरम्, द्वृव, द्वृम ॥ [इष्व, इष्म ॥

५ **अदरिद्वार्**-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्,

६ **दरिद्वरा**-ञकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **दरिद्वर्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म॥

८ **दरिद्वरिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **दरिद्वरिष्य्**-अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१० **अदरिद्वरिष्य्**-अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

पक्षे-दरि-स्थाने, दरी-इति, दर्-इति च ज्ञेयम् ॥

२२ ध्वृं (ध्वृ) कौटिल्ये ॥

१ **दरि**–ध्वरीति, ध्वर्ति, ध्वृतः, ध्वति, ध्वरीषि, ध्वर्षि, ध्वृथः, ध्वृथ, ध्वरीमि, ध्वर्मि, ध्वृवः, ध्वृमः ॥

२ **दरिध्वृ**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **दरि**–ध्वरीतु, ध्वर्तु, ध्वृतात्, ध्वृताम्, ध्वतु, ध्वृहि, ध्वृतात्, ध्वृतम्, ध्वृत, ध्वराणि, ध्वराव, ध्वराम ॥

४ **अदरि**–ध्वरीत्, ध्वः, ध्वृताम्, ध्वरुः, ध्वरीः, ध्वः, ध्वृतम्, ध्वृत, ध्वरम्, ध्वृव, ध्वृम ॥

५ **अदरिध्वर्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **दरिध्वरा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **दरिध्वर्या**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **दरिध्वरिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **दरिध्वरिष्य्**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१०**अदरिध्वरिष्य्**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

पक्षे–दरि–स्थाने, दरी–इति, दर्–इति च ज्ञेयम् ॥

२३ ह्वृं (ह्वृ) कौटिल्ये ॥

१ **जरि**–ह्वरीति, ह्वर्ति, ह्वृतः, ह्वति, ह्वरीषि, ह्वर्षि, ह्वृथः, ह्वृथ, ह्वरीमि, ह्वर्मि, ह्वृवः, ह्वृमः ॥

२ **जरिह्वृ**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **जरि**–ह्वरीतु, ह्वर्तु, ह्वृतात्, ह्वृताम्, ह्वतु, ह्वृहि, ह्वृतात्, ह्वृतम्, ह्वृत, ह्वराणि, ह्वराव, ह्वराम ॥

४ **अजरि**–ह्वरीत्, ह्वः, ह्वृताम्, ह्वरुः, ह्वरीः, ह्वः, ह्वृतम्, ह्वृत, ह्वरम्, ह्वृव, ह्वृम ॥ [इष्व, इष्म ॥

५ **अजरिह्वार्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्,

६ **जरिह्वरा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **जरिह्वर्या**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **जरिह्वरिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **जरिह्वरिष्य्**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अजरिह्वरिष्य्**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

पक्षे जरि–स्थाने, जरी–इति, जर्–इति. च ज्ञेयम् ॥

२४ सृं (सृ) गतौ ॥

१ **सरि**–सरीति, सर्ति, सृतः, स्रति, सरीषि, सर्षि, सृथः, सृथ, सरीमि, सर्मि, सृवः, सृमः ॥

२ **सरिसृ**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **सरि**–सरीतु, सर्तु, सृतात्, सृताम्, स्रतु, सृहि, सृतात्, सृतम्, सृत, सराणि, सराव, सराम ॥

४ **असरि**–सरीत्, सः, सृताम्, सरुः, सरीः, सः, सृतम्, सृत, सरम्, सृव, सृम ॥ [इषम्, इष्व, इष्म ॥

५ **असरिसार्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट,

६ **सरिसरा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **सरिस्रिया**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **सरिसरिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **सरिसरिष्य्**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**असरिसरिष्य्**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

पक्षे सरि–स्थाने, सरी–इति, सर्–इति, च ज्ञेयम् ।

२५ ऋं (ऋ) प्रापणे ॥

१ **अरि**–यरीति, यर्ति, यृतः, य्रति, यरीषि, यर्षि, यृथः, यृथ, यरीमि, यर्मि, यृवः, यृमः ॥

२ **अरियृ**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **अरि**–यरीतु, यर्तु, यृतात्, यृताम्, य्रतु, यृहि, यृतात्, यृतम्, यृत, यराणि, यराव, यराम ॥

४ **आरि**–यरीत्, यः, यृताम्, यरुः, यरीः, यः, यृतम्, यृत, यरम्, यृव, यृम ॥ [इष्व, इष्म ॥

५ **आरियार्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्,

६ **अरियरा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **अरिय्रिया**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **अरियरिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **अरियरिष्य्**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**आरियरिष्य्**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

पक्षे अरि–स्थाने, अरी इति, आरि–स्थाने, आरी इति ज्ञेयम् ।

ऋं (ऋ) प्रापणे ॥

१ **अररीति,** अरर्ति, अर्क्तः, आरति, अररीषि, अरर्षि, अर्क्थः, अर्क्थ, अररीमि, अरर्मि, अर्क्वः, अर्क्मः ॥

२ **अर्क्**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **अररीतु**–अरर्तु, अर्क्तात्, अर्क्ताम्, आरतु, अर्क्हि, अर्क्तात्, अर्क्तम्, अर्क्त, अरराणि, अरराव, अरराम ॥

४ **आ**–ररीत्, रः, र्क्ताम्, ररुः, ररीः, रः, र्क्तम्, र्क्त, ररम्, र्क्व, र्क्म ॥

५ **आरार्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **अररा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **आरिया**–त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥

८ **अररिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **अररिष्यु**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**आररिष्यु**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

२६ तॄ प्लवनतरणयोः। (बाहुलकादत्रेस्वाभावः)

१ **ता**–तर्ति, तीर्तः, तिरति, तर्षि, तीर्थः, तीर्थ, तर्मि, तीर्वः, तीर्मः ॥

२ **तातीर्**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **ता**–तर्तु, तीर्तात्, तीर्ताम्, तिरतु, तीर्हि, तीर्तात्, तीर्तम्, तीर्त, तराणि, तराव, तराम ॥

४ **अता**–तः, तीर्ताम्, तरुः, तः, तीर्तम्, तीर्त, तरम्, तीर्व, तीर्म ॥ [इष्व, इष्म ॥

५ **अतातार्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्,

६ **तातरा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **तातीर्या**–त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥

८ **तातरीता** / **तातरिता** –", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **तातरिष्यु** / **तातरीष्यु** –अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अतातरिष्यु** / **अतातरीष्यु** –अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

२७ ट्धेंं (धे) पाने ॥

१ **दा**–धेति, धाति, त्तः, धति, धेषि, धासि, त्थः, त्थ, धेमि, धामि, द्वः, द्मः ॥

२ **दाधू**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **दा**–धेतु, धातु, त्तात्, त्ताम्, धतु, धेहि, दात्तात्, दात्तम्, दात्त, दाधानि, दाधाव, दाधाम ॥

४ **अदा**–धेत्, धात्, त्ताम्, धुः, धेः, धाः, त्तम्, त्त, धाम्, द्व, द्म ॥

५ **अदा**–धात्, धाताम्, धुः, धाः, धातम्, धात, धाम्, धाव, धाम ॥

६ **दाधा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **दाधेया**–त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥

८ **दाधिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **दाधिष्यु**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१०**अदाधिष्यु**–अत्, अताम्, अन्, अः, अतम्, अत,

२८ दैंव् (दै) शोधने ॥

१ **दा**–देति, दाति, दीतः, दति, देषि, दासि, दीथः दीथ, देमि, दामि, दीवः, दीमः ॥

२ **दादी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **दा**–देतु, दातु, दीतात्, दीताम्, दतु, दीहि, दीतात्, दीतम्, दीत, दानि, दाव, दाम ॥

४ **अदा**–देत्, दात्, दीताम्, दुः, देः, दाः, दीतम्, दीत, दाम्, दीव, दीम ॥

५ **अदादास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **दादा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **दादाया**–त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥

८ **दादिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **दादिष्यु**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अदादिष्यु**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

२९ ध्यैं (ध्यै) चिन्तायाम् ॥

१ **दा**–ध्येति, ध्याति, ध्यीतः, ध्यति, ध्येषि, ध्यासि, ध्यीथः, ध्यीथ, ध्येमि, ध्यामि, ध्यीवः, ध्यीमः ॥

२ **दाध्यी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **दा**–ध्येतु, ध्यातु, ध्यीतात्, ध्यीताम्, ध्यतु, ध्यीहि, ध्यीतात्, ध्यीतम्, ध्यीत, ध्यानि, ध्याव, ध्याम॥

४ **अदा**–ध्येत्, ध्यात्, ध्यीताम्, ध्युः, ध्येः ध्याः, ध्यीतम्, ध्यीत, ध्याम्, ध्याव, ध्याम ॥

५ **अदाध्यास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **दाध्या**–ञकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **दाध्येया** / **दाध्याया** –त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **दाध्यिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **दाध्यिष्यु**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१०**अदाध्यिष्यु**–अत्, अताम्, अन्, अः, अतम्, अत,

३० ग्लैं (ग्लै) हर्षक्षये ॥

१ **जा**–ग्लेति, ग्लाति, ग्लीतः, ग्लति, ग्लेषि, ग्लासि, ग्लीथः, ग्लीथ, ग्लेमि, ग्लामि, ग्लीवः, ग्लीमः ॥

२ **जाग्ली**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **जा**–ग्लेतु, ग्लातु, ग्लीतात्, ग्लीताम्, ग्लतु, ग्लीहि, ग्लीतात्, ग्लीतम्, ग्लीत, ग्लानि, ग्लाव, ग्लाम॥

४ **अजा**–ग्लेत्–ग्लात्, ग्लीताम्, ग्लुः, ग्लेः, ग्लाः, ग्लीतम्, ग्लीत, ग्लाम्, ग्लीव, ग्लीम ॥

५ **अजाग्लास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **जाग्ला**–ञकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **जाग्लेया** / **जाग्लाया** –त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **जाग्लिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **जाग्लिष्यु**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१०**अजाग्लिष्यु**–अत्, अताम्, अन्, अः, अतम्, अत,

३१ म्लैं (म्लै) गात्रविनामे ॥

१ **मा**–म्लेति, म्लाति, म्लीतः, म्लति, म्लेषि, म्लासि, म्लीथः, म्लीथ, म्लेमि, म्लामि, म्लीवः, म्लीमः ॥

२ **माम्ली**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **मा**–म्लेतु, म्लातु, म्लीतात्, म्लीताम्, म्लतु, म्लीहि, म्लीतात्, म्लीतम्, म्लीत, म्लानि, म्लाव, म्लाम॥

४ **अमा**–म्लेत्, म्लात्, म्लीताम्, म्लुः, म्लेः, म्लाः, म्लीतम्, म्लीत, म्लाम्, म्लीव, म्लीम ॥

५ **अमाम्लास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **माम्ला**–ञकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **माम्लेया** / **माम्लाया** –त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **माम्लिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **माम्लिष्यु**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव आम ॥

१०**अमाम्लिष्यु**–अत्, अताम्, अन्, अः, अतम्, अत,

३२ द्यैं (द्यै) न्यङ्करणे ॥

१ **दा**–द्येति, द्याति, द्यीतः, द्यति, द्येषि, द्यासि, द्यीथः, द्यीथ, द्येमि, द्यामि, द्यीवः, द्यीमः ॥

२ **दाद्यी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **दा**–द्येतु द्यातु, द्यीतात्, द्यीताम्, द्यतु, द्यीहि, द्यीतात्, द्यीतम्, द्यीत, द्यानि, द्याव, द्याम ॥

४ **अदा**–द्येत्, द्यात्, द्यीताम्, द्युः, द्येः, द्याः, द्यीतम्, द्यीत, द्याम्, द्यीव, द्यीम ॥

५ **अदाद्यास्**–ईत, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **दाद्या**–ञकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **दाद्येया** / **दाद्याया** –त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **दाद्यिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **दाद्यिष्यु**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१०**अदाद्यिष्यु**–अत्, अताम्, अन्, अः, अतम्, अत,

३३ द्रैं ((द्रै) स्वप्ने ॥

१ **दा**–द्रेति, द्राति, द्रीतः, द्रति, द्रेषि, द्रासि, द्रीथः, द्रीथ, द्रेमि, द्रामि, द्रीवः, द्रीमः ॥

२ **दाद्री**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **दा**–द्रेतु, द्रातु, द्रीतात्, द्रीताम्, द्रतु, द्रीहि, द्रीतात्, द्रीतम्, द्रीत, द्राणि, द्राव, द्राम ॥

४ **अदा**–द्रेत्, द्रात्, द्रीताम्, द्रुः, द्रेः, द्राः, द्रीतम्, द्रीत, द्राम्, द्रीव, द्रीम ॥

५ **अदाद्रास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **दाद्रा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **दाद्रेया** } –त्, स्ताम्, सुः, :, स्तम्, स्त, सम्,
दाद्राया } स्व, स्म ॥

८ **दाद्रिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **दाद्रिष्यु**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१०**अदाद्रिष्यु**–अत्, अताम्, अन्, अः, अतम्, अत,

३४ ध्रैं (ध्रै) तृप्तौ ॥

१ **दा**–ध्रेति, ध्राति, ध्रीतः ध्रति, ध्रेषि, ध्रासि, ध्रीथः, ध्रीथ, ध्रेमि, ध्रामि, ध्रीवः, ध्रीमः ॥

२ **दाध्री**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **दा**–ध्रेतु, ध्रातु, ध्रीतात्, ध्रीताम्, ध्रतु, ध्रीहि, ध्रीतात्, ध्रीतम्, ध्रीत, ध्राणि, ध्राव, ध्राम ॥

४ **अदा**–ध्रेत्, ध्रात्, ध्रीताम्, ध्रुः, ध्रेः, ध्राः, ध्रीतम्, ध्रीत, ध्राम्, ध्रीव, ध्रीम ॥

५ **अदाध्रास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **दाध्रा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **दाध्रेया** } –त्, स्ताम्, सुः, :, स्तम्, स्त, सम्,
दाध्राया } स्व, स्म ॥

८ **दाध्रिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **दाध्रिष्यु**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१०**अदाध्रिष्यु**–अत्, अताम्, अन्, अः, अतम्, अत,

३५ कैं (कै) शब्दे ॥

१ **चा**–केति, काति, कीतः, कति, केषि, कासि, कीथः, कीथ, केमि, कामि, कीवः, कीमः ॥

२ **चाकी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **चा**–केतु, कातु, कीतात्, कीताम्, कतु, कीहि, कीतात्, कीतम्, कीत, कानि, काव, काम ॥

४ **अचा**–केत्, कात्, कीताम्, कुः, केः, काः, कीतम्, कीत, काम्, कीव, कीम ॥

५ **अचाकास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **चाका**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **चाकाया**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म॥

८ **चाकिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **चाकिष्यु**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अचाकिष्यु**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

३६ गैं (गै) शब्दे ॥

१ **जा**–गेति, गाति, गीतः, गति, गेषि, गासि, गीथः, गीथ, गेमि, गामि, गीवः, गीमः ॥

२ **जागी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **जा**–गेतु, गातु, गीतात्, गीताम्, गतु, गीहि, गीतात्, गीतम्, गीत, गानि, गाव, गाम ॥

४ **अजा**–गेत्, गात्, गीताम्, गुः, गेः, गाः, गीतम्, गीत, गाम्, गीव, गीम ॥

५ **अजागास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **जागा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **जागेया**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म॥

८ **जागिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **जागिष्यु**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अजागिष्यु**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

३७ रैं (रै) शब्दे ॥

१ **रा**–रेति, राति, रीतः, रति, रेषि, रासि, रीथः, रीथ, रेमि, रामि, रीवः, रीमः ॥

२ **रारी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **रा**–रेतु, रातु, रीतात्, रीताम्, रतु, रीहि, रीतात्, रीतम्, रीत, राणि, राव, राम ॥

४ **अरा**–रेत्, रात्, रीताम्, रुः, रेः, राः, रीतम्, रीत्, राम्, रीव, रीम ॥

५ **अरारास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **रारा**–ञकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **राराया**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म॥

८ **रारिता**", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **रारिष्यू**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अरारिष्यू**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

३८ ष्ठ्यैं (ष्ठ्यै) संघाते च ॥

१ **ता**–ष्ठ्येति, ष्ठ्याति, ष्ठ्यीतः, ष्ठ्यति, ष्ठ्येषि, ष्ठ्यासि, ष्ठ्यीथः, ष्ठ्यीथ, ष्ठ्येमि, ष्ठ्यामि, ष्ठ्यीवः, ष्ठ्यीमः ॥

२ **ताष्ठ्यी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **ता**–ष्ठ्येतु, ष्ठ्यातु, ष्ठ्यीतात्, ष्ठ्यीताम्, ष्ठ्यतु, ष्ठ्यीहि, ष्ठ्यीतात्, ष्ठ्यीतम्, ष्ठ्यीत, ष्ठ्यानि, ष्ठ्याव, ष्ठ्याम॥

४ **अता**–ष्ठ्येत्, ष्ठ्यात्, ष्ठ्यीताम्, ष्ठ्युः, ष्ठ्येः, ष्ठ्याः, ष्ठ्यीतम्, ष्ठ्यीत, ष्ठ्याम्, ष्ठ्यीव, ष्ठ्यीम ॥

५ **अताष्ठ्यास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **ताष्ठ्या**–ञकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **ताष्ठ्येया** } –त्, स्ताम्, सुः, :, स्तम्, स्त, सम्,
ताष्ठ्याया } स्व, स्म ॥

८ **ताष्ठ्यिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **ताष्ठ्यिष्यू**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१०**अताष्ठ्यिष्यू**–अत्, अताम्, अन्, अः, अतम्, अत,

३९ स्त्यैं (स्त्यै) संघाते च ॥

१ **ता**–स्त्येति, स्त्याति, स्त्यीतः, स्त्यति, स्त्येषि, स्त्यासि, स्त्यीथः, स्त्यीथ, स्त्येमि, स्त्यामि, स्त्यीवः, स्त्यीमः॥

२ **तास्त्यी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **ता**–स्त्येतु, स्त्यातु, स्त्यीतात्, स्त्यीताम्, स्त्यतु, स्त्यीहि, स्त्यीतात्, स्त्यीतम्, स्त्यीत, स्त्यानि, स्त्याव, स्त्याम॥

४ **अता**–स्त्येत्, स्त्यात्, स्त्यीताम्, स्त्युः, स्त्येः, स्त्याः, स्त्यीतम्, स्त्यीत, स्त्याम्, स्त्यीव, स्त्यीम ॥

५ **अतास्त्यास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **तास्त्या**–ञकार, इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **तास्त्येया** } –त्, स्ताम्, सुः, :, स्तम्, स्त,
तास्त्याया } सम्, स्व, स्म ॥

८ **तास्त्यिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **तास्त्यिष्यू**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१०**अतास्त्यिष्यू**–अन्, अताम्, अत्, अः, अतम्, अत,

४० खैं (खै) खदने ॥

१ **चा**–खेति, खाति, खीतः, खैति, खेषि, खासि, खीथः, खीथ, खेमि, खामि, खीवः, खीमः ॥

२ **चाखी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **चा**–खेतु, खातु, खीतात्, खीताम्, खतु, खीहि, खीतात्, खीतम्, खीत, खानि, खाव, खाम ॥

४ **अचा**–खेत्, खात्, खीताम्, खुः, खेः, खाः, खीतम्, खीत, खाम, खीव, खीम ॥

५ **अचाखास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **चाखा**–ञकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **चाखाया**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म॥

८ **चाखिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **चाखिष्यू**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अचाखिष्यू**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

४१ क्षैं (क्षै) क्षये ॥

१ **चा**–क्षेति, क्षाति, क्षीतः, क्षति, क्षेषि, क्षासि, क्षीथः, क्षीथ, क्षेमि, क्षामि, क्षीवः, क्षीमः ॥

२ **चाक्षी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **चा**–क्षेतु, क्षातु. क्षीतात्, क्षीताम्, क्षतु, क्षीहि, क्षीतात्, क्षीतम्, क्षीत, क्षाणि, क्षाव, क्षाम ॥

४ **अचा**–क्षेत्, क्षात्, क्षीताम्, क्षुः, क्षेः, क्षाः, क्षीतम्, क्षीत, क्षाम्, क्षीव, क्षीम ॥

५ **अचाक्षास्**–ईत्, इष्टाम्, इषु, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **चाक्षा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **चाक्षेया** } –त्, स्ताम्, सुः, :, स्तम्, स्त, सम्,
चाक्षाया } स्व, स्म ॥

८ **चाक्षिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **चाक्षिष्यु**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१०**अचाक्षिष्यु**–अत्, अताम्, अन्, अः, अतम्, अत,

४२ जैं (जै) क्षये ॥

१ **जा**–जेति, जाति, जीतः, जति, जेषि, जासि, जीथः, जीथ, जेमि, जामि, जीवः, जीमः ॥

२ **जाजी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **जा**–जेतु, जातु, जीतात्, जीताम्, जतु, जीहि, जीतात्, जीतम्, जीत, जानि, जाव, जाम ॥

४ **अजा**–जेत्, जात्, जीताम्, जुः, जेः, जाः, जीतम्, जीत, जाम्, जीव, जीम ॥

५ **अजाजास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **जाजा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **जाजाया**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **जाजिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **जाजिष्यु**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अजाजिष्यु**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

४३ सैं (सै) क्षये ॥

१ **सा**–सेति, साति, सीतः, सति, सेषि, सासि, सीथः, सीथ, सेमि, सामि, सीवः, सीमः ॥ [याव, याम ॥

२ **सासी**–यात्, याताम्, युः, याः, यातम्, यात, याम्,

३ **सा**–सेतु, सातु, सीतात्, सीताम्, सतु, सीहि, सीतात्, सीतम्, सीत, सानि, साव, साम ॥

४ **असा**–सेत्, सात्, सीताम्, सुः, सेः, साः, सीतम्, सीत, साम्, सीव, सीम ॥

५ **असासास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

असा–सात्, साताम्, सुः, साः, सातम्, सात, साम्, साव, साम ॥

६ **सासा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **सासेया**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **सासिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः स्मः॥

९ **सासिष्यु**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१०**असासिष्यु**–अत्, अताम्, अन्, अः, अतम्, अत,

४४ स्नैं (स्नै) पाके ॥

१ **सा**–स्नेति, स्नाति, स्नीतः, स्नति, स्नेषि, स्नासि, स्नीथः, स्नीथ, स्नेमि, स्नामि, स्नीवः, स्नीमः ॥

२ **सास्नी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **सा**–स्नेतु, स्नातु, स्नीतात्, स्नीताम्, स्नतु, स्नीहि, स्नीतात्, स्नीतम्, स्नीत, स्नाणि, स्नाव, स्नाम ॥

४ **असा**–स्नेत्, स्नात्, स्नीताम्, स्नुः, स्नेः, स्नाः, स्नीतम्, स्नीत, स्नाम्, स्नीव, स्नीम ॥

५ **असास्नास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **सास्ना**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **सास्नेया** } –त्, स्ताम्, सुः, :, स्तम्, स्त,
सास्नाया } स्तम्, स्व, स्म ॥

८ **सास्निता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **सास्निष्यु**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१०**असास्निष्यु**- अत्, अताम्, अन्, अः, अतम्, अत,

४५ श्रैं (श्रै) पाके ॥

१ **शा**–श्रेति, श्राति, श्रीतः, श्रति, श्रेषि, श्रासि, श्रीथः, श्रीथ, श्रेमि श्रामि, श्रीवः, श्रीमः ॥

२ **शाश्री**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **शा**–श्रेतु, श्रातु, श्रीतात्, श्रीताम्, श्रतु, श्रीहि, श्रीतात्, श्रीतम्, श्रीत, श्राणि, श्राव, श्राम ॥

४ **अशा**–श्रेत्, श्रात्, श्रीताम्, श्रुः, श्रेः, श्राः, श्रीतम्, श्रीत, श्राम्, श्रीव, श्रीम ॥

५ **अशाश्रास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **शाश्रा**–ञ्चकार इ० ॥ म्बभूव ई० ॥ मास इ० ॥

७ **शाश्रेया** } –त्, स्ताम्, सुः, :, स्तम्, स्त, सम्,
शाश्राया } स्व, स्म ॥

८ **शाश्रिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **शाश्रिष्यू**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१०**अशाश्रिष्यू**–अत्, अताम्, अन्, अः, अतम्, अत,

४६ पैं (पै) शोषणे ॥

१ **पा**–पेति, पाति, पीतः, पति, पेषि, पासि, पीथः, पीथ, पेमि, पामि, पीवः, पीमः ॥

२ **पापी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **पा**–पेतु, पातु, पीतात्, पीताम्, पतु, पीहि, पीतात्, पीतम्, पीत, पानि, पाव, पाम ॥

४ **अपा**–पेत्, पात्, पीताम्, पुः, पेः, पाः, पीतम्, पीत, पाम्, पीव पीम ॥

५ **अपापास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **पापा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **पापेया**–त् स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **पापिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **पापिष्यू**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अपापिष्यू**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

४७ ओवैं (वै) शोषणे ॥

१ **वा**–वेति, वाति, वीतः, वति, वेषि, वासि, वीथः, वीथ, वेमि, वामि, वीवः, वीमः ॥

२ **वावी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **वा**–वेतु, वातु, वीतात्, वीताम्, वतु, वीहि वीतात्, वीतम्, वीत, वानि, वाव, वाम ॥

४ **अवा**–वेत्, वात्, वीताम्, वुः, वेः, वाः, वीतम्, वीत, वाम्, वीव, वीम ॥

५ **अवावास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **वावा**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **वावाया**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **वाविता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **वाविष्यू**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अवाविष्यू**–अत्, अताम्, अन्, अः, अतम्, अत अम्, आव, आम ॥

४८ ष्णैं (स्नै) वेष्टने ॥

१ **सा**–स्नेति, स्नाति, स्नीतः, स्नति, स्नेषि, स्नासि, स्नीथः, स्नीथ, स्नेमि, स्नामि, स्नीवः, स्नीमः ॥

२ **सास्नी**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **सा**–स्नेतु, स्नातु, स्नीतात्, स्नीताम्, स्नतु, स्नीहि, स्नीतात्, स्नीतम्, स्नीत, स्नानि, स्नाव, स्नाम ॥

४ **असा**–स्नेत्, स्नात्, स्नीताम्, स्नुः, स्नेः, स्नाः, स्नीतम्, स्नीत, स्नाम्, स्नीव, स्नीम ॥

५ **असास्नास्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **सास्ना**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **सास्नेया** } –त्, स्ताम्, सुः, :, स्तम्, स्त, सम्,
सास्नाया } स्व, स्म ॥

८ **सास्निता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **सास्निष्यू**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥ [अम्, आव, आम ॥

१०**असास्निष्यू**–अत्, अताम्, अन्, अः, अतम्, अत,

४९ फक्क (फक्क्) नीचैर्गतौ ॥

१ **पाफ**–क्रीति, क्त्ति, क्त्तः, क्रति, क्रीषि, क्त्षि, क्त्षिष, क्त्थः, क्त्थ, क्रीमि, क्त्मि, क्त्वः, क्त्मः ॥

२ **पाफक्क्**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **पाफ**–क्रीतु, क्त्तु, क्त्तात्, क्त्ताम्, क्रतु, क्त्ग्धि, क्त्तात्, क्त्तम्, क्त्त, क्रानि, क्राव, क्राम ॥

४ **अपाफ**–क्रीत्, क्त्, ग्, क्त्ताम्, क्त्तुः, क्रीः, क्त्, ग्, क्त्तम्, क्त्त, क्रम्, क्त्व, क्त्म ॥

५ **अपाफक्क्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **पाफक्का**–चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **पाफक्क्या**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म॥

८ **पाफक्किता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ **पाफक्किष्य्**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अपाफक्किष्य्**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

५० तक (तक्) हसने ॥

१ **तात**–क्रीति, क्त्ति, क्त्तः, क्रति, क्रीषि, क्त्षि, क्त्षिष, क्त्थः, क्त्थ, क्रीमि, क्त्मि, क्त्वः, क्त्मः ॥

२ **तातक्**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **तात**–क्रीतु, क्त्तु, क्त्तात्, क्त्ताम्, क्रतु, क्त्ग्धि, क्त्तात्, क्त्तम्, क्त्त, क्रानि, क्राव, क्राम ॥

४ **अतात**–क्रीत्, क्त्, ग्, क्त्ताम्, क्त्तुः, क्रीः, क्त्, ग्, क्त्तम्, क्त्त, क्रम्, क्त्व, क्त्म ॥

५ **अतातक्** / **अतातक्** –ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **तातका**–चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **तातक्या**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म॥

८ **तातकिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **तातक्किष्य्**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अतातक्किष्य्**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

५१ तङ्क (तङ्क्) कृच्छ्रजीवने ॥

१ **तातङ्**–क्रीति, क्त्ति, क्त्तः, क्रति, क्रीषि, क्त्षि, क्त्षिष, क्त्थः, क्त्थ, क्रीमि, क्त्मि, क्त्वः, क्त्मः ॥

२ **तातङ्क्**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **तातङ्**–क्रीतु, क्त्तु, क्त्तात्, क्त्ताम्, क्रतु, क्त्ग्धि, क्त्तात्, क्त्तम्, क्त्त, क्रानि, क्राव, क्राम ॥

४ **अतात**–क्रीत्, क्त्, ग्, क्त्ताम्, क्त्तुः, क्रीः, क्त्, ग्, क्त्तम्, क्त्त, क्रम्, क्त्व, क्त्म ॥

५ **अतातङ्क्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **तातङ्का**–चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **तातङ्क्या**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म॥

८ **तातङ्किता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **तातङ्किष्य्**–अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः ॥

१०**अतातङ्किष्य्**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

५२ शुक (शुक्) गतौ ॥

१ **शो**–शुक्रीति, शोक्त्ति, शुक्त्तः, शुक्रति, शुक्रीषि, शोक्त्षि, शुक्त्षिष, शुक्त्थः, शुक्त्थ, शुक्रीमि, शोक्त्मि, शुक्त्वः, शुक्त्मः ॥

२ **शोशुक्**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **शो**–शुक्रीतु, शोक्त्तु, शुक्त्तात्, शुक्त्ताम्, शुक्रतु, शुग्धि, शुक्त्तात्, शुक्त्तम्, शुक्त्त, शुक्रानि, शुक्राव, शुक्राम ॥

४ **अशो**–शुक्रीत्, शोक्, शोग्, शुक्त्ताम्, शुक्तुः, शुक्रीः, शोक्, शोग्, शुक्त्तम्, शुक्त्त, शुक्रम्, शुक्त्व, शुक्त्म ॥

५ **अशोशोक्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **शोशोका**–चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **शोशुक्या**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **शोशोकिता**–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **शोशोकिष्य्**–अति, अतः, अन्ति, असि, अथः, अथ, आमि आवः, आमः ॥

१०**अशोशोकिष्य्**–अत्, अताम्, अन्, अः, अतम्, अत, अम्, आव, आम ॥

५३ बुक्क (बुक्क्) भाषणे ॥

१ **बोबु**–क्कीति, क्कुक्ति, क्कुक्तः, क्कति, क्कीषि, क्कुख्षि, क्कुक्षि, क्कुक्थः, क्कुक्थ, क्कीमि, क्किम, क्कुवः, क्कुमः ॥

२ **बोबुक्क्**–यात्, याताम्, युः, याः, यातम्, यात, याम्, याव, याम ॥

३ **बोबु**–क्कीतु, क्कुक्तु, क्कुक्तात्, क्कुक्ताम्, क्कतु, क्कुग्धि, क्कुक्तात्, क्कुक्तम्, क्कुक्त, क्कानि, क्काव, क्काम ॥

४ **अबोबु**–क्कीत्, क्कु, ग्, क्ताम्, क्कुः, क्कीः, क्कु, ग्, क्कुक्तम्, क्कुक्त, क्कम्, क्कुव, क्कुम ॥

५ **अबोबुक्क्**–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इष्म्, इष्व, इष्म ॥

६ **बोबुक्का**–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **बोबुक्क्या**–त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म॥

